# Shuka-Rahasya Upanishad

# શુકરહસ્યોપનિષત્

## Document Information

Text title : Shuka-Rahasya Upanishad

File name : shuka.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 35/108; Krishna Yajurveda Samanya upanishad

Latest update : Jan. 16, 2000, July 17, 2010

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શુકરહસ્યોપનિષત્

પ્રજ્ઞાનાદિમહાવાક્યરહસ્યાદિકલેવરમ્ ।
વિકલેવરકૈવલ્યં ત્રિપાદ્રામમહં ભજે ॥

ॐ સહ નાવવતુ ॥ સહ નૌ ભુનક્તુ ॥  સહ વીર્યં કરવાવહૈ ॥

તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ॐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

અથાતો રહસ્યોપનિષદં વ્યાખ્યાસ્યામો દેવર્ષયો
બ્રહ્માણં સમ્પૂજ્ય પ્રણિપત્ય પપ્રચ્છુર્ભગવન્નસ્માકં
રહસ્યોપનિષદં બ્રૂહીતિ । સોઽબ્રવીત્ ।
પુરા વ્યાસો મહાતેજાઃ સર્વવેદતપોનિધિઃ ।
પ્રણિપત્ય શિવં સામ્બં કૃતાઞ્જલિરુવાચ હ ॥ ૧॥

શ્રીવેદવ્યાસ ઉવાચ ।
દેવદેવ મહાપ્રાજ્ઞ પાશચ્છેદદૃઢવ્રત ।
શુકસ્ય મમ પુત્રસ્ય વેદસંસ્કારકર્મણિ ॥ ૨॥

બ્રહ્મોપદેશકાલોઽયમિદાનીં સમુપસ્થિતઃ ।
બ્રહ્મોપદેશઃ કર્તવ્યો ભવતાદ્ય જગદ્ગુરો ॥ ૩॥

ઈશ્વર ઉવાચ ।
મયોપદિષ્ટે કૈવલ્યે સાક્ષાદ્બ્રહ્મણિ શાશ્વતે ।
વિહાય પુત્રો નિર્વેદાત્પ્રકાશં યાસ્યતિ સ્વયમ્ ॥ ૪॥

શ્રીવેદવ્યાસ ઉવાચ ।
યથા તથા વા ભવતુ હ્યુપનાયનકર્મણિ ।
ઉપદિષ્ટે મમ સુતે બ્રહ્મણિ ત્વત્પ્રસાદતઃ ॥ ૫॥

સર્વજ્ઞો ભવતુ ક્ષિપ્રં મમ પુત્રો મહેશ્વર ।

તવ પ્રસાદસમ્પન્નો લભેન્મુક્તિં ચતુર્વિધામ્ ॥ ૬॥

તચ્છ્રુત્વા વ્યાસવચનં સર્વદેવર્ષિસંસદિ ।
ઉપદેષ્ટું સ્થિતઃ શમ્ભુઃ સામ્બો દિવ્યાસને મુદા ॥ ૭॥

કૃતકૃત્યઃ શુકસ્તત્ર સમાગત્ય સુભક્તિમાન્ ।
તસ્માત્સ પ્રણવં લબ્ધ્વા પુનરિત્યબ્રવીચ્છિવમ્ ॥ ૮॥

શ્રીશુક ઉવાચ ।
દેવાદિદેવ સર્વજ્ઞ સચ્ચિદાનન્દ લક્ષણ ।
ઉમારમણ ભૂતેશ પ્રસીદ કરુણાનિધે ॥ ૯॥

ઉપદિષ્ટં પરબ્રહ્મ પ્રણવાન્તર્ગતં પરમ્ ।
તત્ત્વમસ્યાદિવાક્યાનાં પ્રજ્ઞાદીનાં વિશેષતઃ ॥ ૧૦॥

શ્રોતુમિચ્છામિ તત્ત્વેન ષડઙ્ગાનિ યથાક્રમમ્ ।
વક્તવ્યાનિ રહસ્યાનિ કૃપયાદ્ય સદાશિવ ॥ ૧૧॥

શ્રીસદાશિવ ઉવાચ ।
સાધુ સાધુ મહાપ્રાજ્ઞ શુક જ્ઞાનનિધે મુને ।
પ્રષ્ટવ્યં તુ ત્વયા પૃષ્ટં રહસ્યં વેદગર્ભિતમ્ ॥ ૧૨॥

રહસ્યોપનિષન્નામ્ના સષડઙ્ગમિહોચ્યતે ।
યસ્ય વિજ્ઞાનમાત્રેણ મોક્ષઃ સાક્ષાન્ન સંશયઃ ॥ ૧૩॥

અઙ્ગહીનાનિ વાક્યાનિ ગુરુર્નોપદિશેત્પુનઃ ।
સષડઙ્ગાન્યુપદિશેન્મહાવાક્યાનિ કૃત્સ્નશઃ ॥ ૧૪॥

ચતુર્ણામપિ વેદાનાં યથોપનિષદઃ શિરઃ ।
ઇયં રહસ્યોપનિષત્તથોપનિષદાં શિરઃ ॥ ૧૫॥

રહસ્યોપનિષદ્બ્રહ્મ ધ્યાતં યેન વિપશ્ચિતા ।
તીર્થૈર્મન્ત્રૈઃ શ્રુતૈર્જપ્યૈસ્તસ્ય કિં પુણ્યહેતુભિઃ ॥ ૧૬॥

વાક્યાર્થસ્ય વિચારેણ યદાપ્નોતિ શરચ્છતમ્ ।
એકવારજપેનૈવ ઋષ્યાદિધ્યાનતશ્ચ યત્ ॥ ૧૭॥

ૐ અસ્ય શ્રીમહાવાક્યમહામન્ત્રસ્ય હંસ ઋષિઃ ।
અવ્યક્તગાયત્રી છન્દઃ । પરમહંસો દેવતા ।
હં બીજમ્ । સઃ શક્તિઃ । સોઽહં કીલકમ્ ।

મમ પરમહંસપ્રીત્યર્થે મહાવાક્યજપે વિનિયોગઃ ।
સત્યં જ્ઞાનમનન્તં બ્રહ્મ અઙ્ગુષ્ઠાભ્યાં નમઃ ।
નિત્યાનન્દો બ્રહ્મ તર્જનીભ્યાં સ્વાહા ।
નિત્યાનન્દમયં બ્રહ્મ મધ્યમાભ્યાં વષટ્ ।
યો વૈ ભૂમા અનામિકાભ્યાં હુમ્ ।
યો વૈ ભૂમાદિપતિઃ કનિષ્ઠિકાભ્યાં વૌષટ્ ।
એકમેવાદ્વિતીયં બ્રહ્મ કરતલકરપૃષ્ઠાભ્યાં ફટ્ ॥

સત્યં જ્ઞાનમનન્તં બ્રહ્મ હૃદયાય નમઃ ।
નિત્યાનન્દો બ્રહ્મ શિરસે સ્વાહા ।
નિત્યાનન્દમયં બ્રહ્મ શિખાયૈ વષટ્ ।
યો વૈ ભૂમા કવચાય હુમ્ ।
યો વૈ ભૂમાધિપતિઃ નેત્રત્રયાય વૌષટ્ ।
એકમેવાદ્વિતીયં બ્રહ્મ અસ્ત્રાય ફટ્ ।
ભૂર્ભુવઃસુવરોમિતિ દિગ્બન્ધઃ ।
ધ્યાનમ્ ।
નિત્યાનન્દં પરમસુખદં કેવલં જ્ઞાનમૂર્તિં
વિશ્વાતીતં ગગનસદૃશં તત્ત્વમસ્યાદિલક્ષ્યમ્ ॥

એકં નિત્યં વિમલમચલં સર્વધીસાક્ષિભૂતં
ભાવાતીતં ત્રિગુણરહિતં સદ્ગુરું તં નમામિ ॥ ૧॥

અથ મહાવાક્યાનિ ચત્વારિ । યથા ।
ૐ પ્રજ્ઞાનં બ્રહ્મ ॥ ૧॥

ૐ અહં બ્રહ્માસ્મિ ॥ ૨॥

ૐ તત્ત્વમસિ ॥ ૩॥

ૐ અયમાત્મા બ્રહ્મ ॥ ૪॥

તત્ત્વમસીત્યભેદવાચકમિદં યે જપન્તિ
તે શિવસ્સાયુજ્યમુક્તિભાજો ભવન્તિ ॥

તત્પદમહામન્ત્રસ્ય । પરમહંસઃ ઋષિઃ ।
અવ્યક્તગાયત્રી છન્દઃ । પરમહંસો દેવતા ।
હં બીજમ્ । સઃ શક્તિઃ । સોઽહં કીલકમ્ ।

મમ સાયુજ્યમુક્ત્યર્થે જપે વિનિયોગઃ ।
તત્પુરુષાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ઈશાનાય તર્જનીભ્યાં સ્વાહા ।
અઘોરાય મધ્યમાભ્યાં વષટ્
સદ્યોજાતાય અનામિકાભ્યાં હુમ્ ।
વામદેવાય કનિષ્ઠિકાભ્યાં વૌષટ્ ।
તત્પુરુષેશાનાઘોરસદ્યોજાતવામદેવેભ્યો
નમઃ કરતલકરપૃષ્ઠાભ્યાં ફટ્ ।
એવં હૃદયાદિન્યાસઃ ।
ભૂર્ભુવઃસુવરોમિતિ દિગ્બન્ધઃ ॥

ધ્યાનમ્ ।
જ્ઞાનં જ્ઞેયં જ્ઞાનગમ્યાદિતીતં
 શુદ્ધં બુદ્ધં મુક્તમપ્યવ્યયં ચ ।
સત્યં જ્ઞાનં સચ્ચિદાનન્દરૂપં
 ધ્યાયેદેવં તન્મહોભ્રાજમાનમ્ ॥

ત્વંપદ મહામન્ત્રસ્ય વિષ્ણુરૃષિઃ ।
ગાયત્રી છન્દઃ । પરમાત્મા દેવતા ।
ઐં બીજમ્ । ક્લીં શક્તિઃ । સૌઃ કીલકમ્ ।
મમ મુક્ત્યર્થે જપે વિનિયોગઃ ।
વાસુદેવાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
સઙ્કર્ષણાય તર્જનીભ્યાં સ્વાહા ।
પ્રદ્યુમ્નાય મધ્યમાભ્યાં વષટ્ ।
અનિરુદ્ધાય અનામિકાભ્યાં હુમ્ ।
વાસુદેવાય કનિષ્ઠિકાભ્યાં વૌષટ્ ।
વાસુદેવસઙ્કર્ષણપ્રદ્યુમ્નાનિરુદ્ધેભ્યઃ
કરતલકરપૃષ્ઠાભ્યાં ફટ્ ।
એવં હૃદયાદિન્યાસઃ ।
ભૂર્ભુવઃસુવરોમિતિ દિગ્બન્ધઃ ॥

ધ્યાનમ્ ॥

જીવત્વં સર્વભૂતાનાં સર્વત્રાખણ્ડવિગ્રહમ્ ।

ચિત્તાહઙ્કારયન્તારં જીવાખ્યં ત્વંપદં ભજે ।
અસિપદમહામન્ત્રસ્ય મન ઋષિઃ ।
ગાયત્રી છન્દઃ । અર્ધનારીશ્વરો દેવતા ।
અવ્યક્તાદિર્બીજમ્ । નૃસિંહઃ શક્તિઃ ।
પરમાત્મા કીલકમ્ । જીવબ્રહ્મૈક્યાર્થે જપે વિનિયોગઃ ।
પૃથ્વીદ્વ્યણુકાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
અબ્દ્વ્યણુકાય તર્જનીભ્યાં સ્વાહા ।
તેજોદ્વ્યણુકાય મધ્યમાભ્યાં વષટ્ ।
વાયુદ્વ્યણુકાય અનામિકાભ્યં હુમ્ ।
આકાશદ્વ્યણુકાય કનિષ્ઠિકાભ્યાં વૌષટ્ ।
પૃથિવ્યપ્તેજોવાય્વાકાશદ્વ્યણુકેભ્યઃ
કરતલકરપૃષ્ઠાભ્યાં ફટ્ ।
ભૂર્ભુવઃસુવરોમિતિ દિગ્બન્ધઃ ॥

ધ્યાનમ્ ॥

જીવો બ્રહ્મેતિ વાક્યાર્થં યાવદસ્તિ મનઃસ્થિતિઃ ।
ઐક્યં તત્ત્વં લયે કુર્વન્ધ્યાયેદસિપદં સદા ॥

એવં મહાવાક્યષડઙ્ગાન્યુક્તાનિ ॥

અથ રહસ્યોપનિષદ્વિભાગશો વાક્યાર્થશ્લોકાઃ પ્રોચ્યન્તે ॥

યેનેક્ષતે શ‍ૃણોતીદં જિઘ્રતિ વ્યાકરોતિ ચ ।
સ્વાદ્વસ્વાદુ વિજાનાતિ તત્પ્રજ્ઞાનમુદીરિતમ્ ॥ ૧॥

ચતુર્મુખેન્દ્રદેવેષુ મનુષ્યાશ્વગવાદિષુ ।
ચૈતન્યમેકં બ્રહ્માતઃ પ્રજ્ઞાનં બ્રહ્મ મય્યપિ ॥ ૨॥

પરિપૂર્ણઃ પરાત્માસ્મિન્દેહે વિદ્યાધિકારિણિ ।
બુદ્ધેઃ સાક્ષિતયા સ્થિત્વા સ્ફુરન્નહમિતીર્યતે ॥ ૩॥

સ્વતઃ પૂર્ણઃ પરાત્માત્ર બ્રહ્મશબ્દેન વર્ણિતઃ ।
અસ્મીત્યૈક્યપરામર્શસ્તેન બ્રહ્મ ભવામ્યહમ્ ॥ ૪॥

એકમેવાદ્વિતીયં સન્નામરૂપવિવર્જિતમ્ ।
સૃષ્ટેઃ પુરાધુનાપ્યસ્ય તાદૃક્ત્વં તદિતીર્યતે ॥ ૫॥

શ્રોતુર્દેહેન્દ્રિયાતીતં વસ્ત્વત્ર ત્વંપદેરિતમ્ ।

એકતા ગ્રાહ્યતેऽસીતિ તદૈક્યમનુભૂયતામ્ ॥ ૬॥

સ્વપ્રકાશાપરોક્ષત્વમયમિત્યુક્તિતો મતમ્ ।
અહઙ્કારાદિદેહાન્તં પ્રત્યગાત્મેતિ ગીયતે ॥ ૭॥

દૃશ્યમાનસ્ય સર્વસ્ય જગતસ્તત્ત્વમીર્યતે ।
બ્રહ્મશબ્દેન તદ્બ્રહ્મ સ્વપ્રકાશાત્મરૂપકમ્ ॥ ૮॥

અનાત્મદૃષ્ટેરવિવેકનિદ્રા-
 મહં મમ સ્વપ્નગતિં ગતોऽહમ્ ।
સ્વરૂપસૂર્યેऽભ્યુદિતે સ્ફુટોક્તે-
 ર્ગુરોર્મહાવાક્યપદૈઃ પ્રબુદ્ધઃ ॥ ૯॥

વાચ્યં લક્ષ્યમિતિ દ્વિધાર્થસરણીવાચ્યસ્ય હિ ત્વંપદે
 વાચ્યં ભૌતિકમિન્દ્રિયાદિરપિ યલ્લક્ષ્યં ત્વમર્થશ્ચ સઃ ।
વાચ્યં તત્પદમીશતાકૃતમતિર્લક્ષ્યં તુ સચ્ચિત્સુખા-
 નન્દબ્રહ્મતદર્થ એષ ચ તયોરૈક્યં ત્વસીદં પદમ્ ॥ ૧૦॥

ત્વમિતિ તદિતિ કાર્યે કારણે સત્યુપાધૌ
 દ્વિતયમિતરથૈકં સચ્ચિદાનન્દરૂપમ્ ।
ઉભયવચનહેતુ દેશકાલૌ ચ હિત્વા
 જગતિ ભવતિ સોયં દેવદત્તો યથૈકઃ ॥ ૧૧॥

કાર્યોપાધિરયં જીવઃ કારણોપાધિરીશ્વરઃ ।
કાર્યકારણતાં હિત્વા પૂર્ણબોધોऽવશિષ્યતે ॥ ૧૨॥

શ્રવણં તુ ગુરોઃ પૂર્વં મનનં તદનન્તરમ્ ।
નિદિધ્યાસનમિત્યેતત્પૂર્ણબોધસ્ય કારણમ્ ॥ ૧૩॥

અન્યવિદ્યાપરિજ્ઞાનમવશ્યં નશ્વરં ભવેત્ ।
બ્રહ્મવિદ્યાપરિજ્ઞાનં બ્રહ્મપ્રાપ્તિકરં સ્થિતમ્ ॥ ૧૪॥

મહાવાક્યાન્યુપદિશેત્સષડઙ્ગાનિ દેશિકઃ ।
કેવલં ન હિ વાક્યાનિ બ્રહ્મણો વચનં યથા ,, ૧૫॥

ઈશ્વર ઉવાચ ।
એવમુક્ત્વા મુનિશ્રેષ્ઠ રહસ્યોપનિષચ્છુક ।
મયા પિત્રાનુનીતેન વ્યાસેન બ્રહ્મવાદિના ॥ ૧૬॥

તતો બ્રહ્મોપદિષ્ટં વૈ સચ્ચિદાનન્દલક્ષણમ્ ।
જીવન્મુક્તઃ સદા ધ્યાયન્નિત્યસ્ત્વં વિહરિષ્યસિ ॥ ૧૭॥

યો વેદાદૌ સ્વરઃ પ્રોક્તો વેદાન્તે ચ પ્રતિષ્ઠિતઃ ।
તસ્ય પ્રકૃતિલીનસ્ય યઃ પરઃ સ મહેશ્વરઃ ॥ ૧૮॥

ઉપદિષ્ટઃ શિવેનેતિ જગત્તન્મયતાં ગતઃ ।
ઉત્થાય પ્રણિપત્યેશં ત્યક્તાશેષપરિગ્રહઃ ॥ ૧૯॥

પરબ્રહ્મપયોરાશૌ પ્લવન્નિવ યયૌ તદા ।
પ્રવ્રજન્તં તમાલોક્ય કૃષ્ણદ્વૈપાયનો મુનિઃ ॥ ૨૦॥

અનુવ્રજન્નાજુહાવ પુત્રવિશ્લેષકાતરઃ ।
પ્રતિનેદુસ્તદા સર્વે જગત્સ્થાવરજઙ્ગમાઃ ॥ ૨૧॥

તચ્છ્રુત્વા સકલાકારં વ્યાસઃ સત્યવતીસુતઃ ।
પુત્રેણ સહિતઃ પ્રીત્યા પરાનન્દમુપેયિવાન્ ॥ ૨૨॥

યો રહસ્યોપનિષદમધીતે ગુર્વનુગ્રહાત્ ।
સર્વપાપવિનિર્મુક્તઃ સાક્ષાત્કૈવલ્યમશ્નુતે
સાક્ષાત્કૈવલ્યમશ્નુત ઇત્યુપનિષત્ ॥

ૐ સહ નાવવતુ ॥ સહ નૌ ભુનક્તુ ॥ સહ વીર્યં કરવાવહૈ ॥

તેજસ્વિનાધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

॥ ઇતિ શુકરહસ્યોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

*Shuka-Rahasya Upanishad*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*